लक्षणं केचित् कृतं तदयुक्तिशून्यं दुर्घटं चैतद्-
पेक्षितम्। इत्थप्रमाणाकारसुषिरं पात्रं घटी-
संज्ञमङ्गीकृतम्। द्युनिशनिमज्जनसङ्ख्यया यदि
षटत्रिंशच्छतानि पानीयपलानि लभ्यन्ते तदै-
केन निमज्जनेन किमिति त्रैराशिकम्।" इति
घटीयन्त्रम्॥ अन्यानि कालमानयन्त्राणि तु
यन्त्रशब्दे द्रष्टव्यानि॥)

घटोत्कचः, पुं, (घट इव उन्नतः कचोऽस्य।)
राक्षसविशेषः। स तु हिडिम्बाराक्षसीगर्भे
भीमसेनाज्जातः॥ इति महाभारतम्॥ (अस्य
नामनिरुक्त्या सह जन्मादिविवरणं यथा, महा-
भारते। १। १५६। २१—६३।

"तथेति तत् प्रतिश्रुत्य हिडिम्बा राक्षसी तदा।
भीमसेनमुपादाय सोर्द्ध्वमाचक्रमे ततः॥
शैलशृङ्गेषु रम्येषु देवतायतनेषु च।
मृगपक्षिविघुष्टेषु रमणीयेषु सर्व्वदा॥
कृत्वा च रूपं परमं सर्व्वाभरणभूषिता।
सञ्जल्पन्ती सुमधुरं रमयामास पाण्डवम्॥
तथैव वनदुर्गेषु पुष्पितद्रुमसानुषु।
सरःसु रमणीयेषु पद्मोत्पलयुतेषु च॥
नदीद्वीपप्रदेशेषु वैदूर्य्यसिकतासु च।
सुतीर्थवनतोयासु तथा गिरिनदीषु च॥
काननेषु विचित्रेषु पुष्पितद्रुमवल्लिषु।
हिमवद्गिरिकुञ्जेषु गुहासु विविधासु च॥
प्रफुल्लशतपत्रेषु सरःस्वमलवारिषु।
सागरस्य प्रदेशेषु मणिहेमचितेषु च॥
पत्तनेषु च रम्येषु तथैवोपवनेषु च।
देवारण्येषु पुण्येषु तथा पर्व्वतसानुषु॥
गुह्यकानां निवासेषु तापसायतनेषु च।
सर्व्वर्त्तुफलपुष्पेषु मानसेषु सरःसु च॥
बिभ्रती परमं रूपं रमयामास पाण्डवम्।
रमयन्ती तथा भीमं तत्र तत्र मनोजवा॥
प्रजज्ञे राक्षसीपुत्त्रं भीमसेनात् महाबलम्।
विरूपाक्षं महावक्त्रं शङ्कुकर्णं विभीषणम्॥
भीमनादं सुताम्रोष्ठं तीक्ष्णदंष्ट्रं महारवम्।
महेष्वासं महावीर्य्यं महासत्त्वं महाभुजम्॥
महाजवं महाकायं महामायमरिन्दमम्।
दीर्घघोणं महोरस्कं विकटोद्बद्धपिण्डिकम्॥
अमानुषं मानुषजं भीमवेगं महाबलम्।
यः पिशाचानतीवान्यान् बभूवातीव राक्षसान्॥
बालोऽपि यौवनं प्राप्तो मानुषेषु विशाम्पते!।
सर्व्वास्त्रेषु परं वीरः प्रकर्षमगमद् बली॥
सद्यो हि गर्भान् राक्षस्यो लभन्ते प्रसवन्ति च।
कामरूपधराश्चैव भवन्ति बहुरूपिकाः॥
प्रणम्य विकचः पादावग्रह्णात् स पितुस्तदा।
मातुश्च परमेष्वासस्तौ च नामास्य चक्रतुः॥
घटो हास्योत्कच इति माता तं प्रत्यभाषत।
अब्रवीत्तेन नामास्य घटोत्कच इति स्म ह॥"

असौ हि कुरुक्षेत्रयुद्धे कर्णनिक्षिप्तैकपुरुष-
घातिन्या वासवदत्तया शक्त्या आहतो
मृतश्च। यथा, महाभारते। ७। १७७।
४८—६३।



"ततोऽब्रुवन् कुरवः सर्व्व एव
कर्णं दृष्ट्वा घोररूपाञ्च मायाम्।
शक्त्या रक्षो जहि कर्णाद्य तूर्णं
नश्यन्त्येते कुरवो धार्त्तराष्ट्राः॥
करिष्यतः किञ्च नो भीमपार्थौ
तपन्तमेनं जहि पापं निशीथे।
यो नः संग्रामाद् घोररूपाद्विमुच्येत्
स नः पार्थान् सबलान् योधयेत॥
तस्मादेनं राक्षसं घोररूपं
जहि शक्त्या वै दत्तया वासवेन।
मा कौरवाः सर्व्व एवेन्द्रकल्पा
रात्रियुद्धे कर्ण! नेशुः सयोधाः॥
स वध्यमानो रक्षसा वै निशीथे
दृष्ट्वा राजंस्त्रास्यमानं बलञ्च।
महच्च श्रुत्वा निनदं कौरवाणां
मतिं दध्रे शक्तिमोक्षाय कर्णः॥
स वै क्रुद्धः सिंह इवात्यमर्षी
नामर्षयत् प्रतिघातं रणे तम्।
शक्तिं श्रेष्ठां वैजयन्तीमसह्यां
समाददे तस्य वधं चिकीर्षन्॥
याऽसौ राजन्! निहिता वर्षपूगान्
वधायाजौ सत्कृता फाल्गुनस्य।
यां वै प्रादात् सूतपुत्त्राय शक्रः
शक्तिं श्रेष्ठां कुण्डलाभ्यां निनाय॥
तां वै शक्तिं लेलिहानां प्रदीप्तां
पाशैर्युक्तामन्तकस्येव रात्रिम्।
मृत्योः स्वसारं ज्वलितामिवोल्कां
वैकर्त्तनः प्राहिणोद्राक्षसाय॥
तामुत्तमां परकायावहन्त्रीं
दृष्ट्वा सौतेर्बाहुसंस्थां ज्वलन्तीम्।
भीतं रक्षो विप्रदुद्राव राजन्!
कृत्वात्मानं विन्ध्यतुल्यप्रमाणम्॥
दृष्ट्वा शक्तिं कर्णबाह्वन्तरस्थां
नेदुर्भूतान्यन्तरीक्षे नरेन्द्र!।
ववुर्वातास्तुमुलाश्चापि राजन्!
सनिर्घाता चाशनिर्गां जगाम॥
सा तां मायां भस्म कृत्वा ज्वलन्ती
भित्त्वा गाढं हृदयं राक्षसस्य।
ऊर्द्ध्वं ययौ दीप्यमाना निशायां
नक्षत्राणामन्तराण्याविशन्ती॥
युद्धा चित्रैर्विविधैः शस्त्रपूगै-
र्दिव्यैर्वीरो मानुषै राक्षसैश्च।
नदन्नादान् विविधान् भैरवांश्च
प्राणानिष्टांस्त्याजितः शक्रशक्त्या॥
इदञ्चान्यच्चित्रमाश्चर्य्यरूपं
चकारासौ कर्म्म शत्रुक्षयाय।
तस्मिन् काले शक्तिनिर्भिन्नमर्म्मा
बभौ राजन्! शैलमेघप्रकाशः॥
ततोऽन्तरीक्षादपतद्गतासुः
स राक्षसेन्द्रो भुवि भिन्नदेहः।
अवाक्शिरास्तब्धगात्रो विजिह्वो
घटोत्कचो महदास्थाय रूपम्॥
स तद्रूपं भैरवं भीमकर्म्मा
भीमं कृत्वा भैमसेनिः पपात।
हतोऽप्येवं तव सैन्यैकदेश-
मपोथयत् स्वेन देहेन राजन्!॥
ततो मिश्राः प्राणदन् सिंहनादै-
र्भेर्य्यश्च शङ्खा मुरजाश्चानकाश्च।
दग्धां मायां निहतं राक्षसञ्च
दृष्ट्वा हृष्टाः प्राणदन् कौरवेयाः॥
ततः कर्णः कुरुभिः पूज्यमानो
यथा शक्रो वृत्रवधे मरुद्भिः।
अन्वारूढ़स्तव पुत्त्रं रथस्थं
हृष्टश्चापि प्राविशत् स्वं स्वसैन्यम्॥")

घटोत्कचान्तकः, पुं, (घटोत्कचस्य अन्तकः
संहारकः।) कर्णराजः। इति त्रिकाण्डशेषः॥

घटोद्भवः, पुं, (उद्भवतीति उद्भवः घटः कलसः
उद्भवः उत्पत्तिस्थानं यस्य। यद्वा घटात्
उद्भवतीति। उत्+भू+अच्।) अगस्त्यमुनिः।
इति हेमचन्द्रः। २। ३६॥

घट्ट, क चाले। इति कविकल्पद्रुमः॥ (चुरां-
परं-अकं क्वचित् सकञ्च-सेट्।) टद्वयान्तः।
चालश्चलनम्। क, घट्टयति मेघो वायुना। इति
दुर्गादासः॥

घट्ट, ङ चाले। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-
अकं क्वचित् सकञ्च-सेट्।) टद्वयान्तः। ङ,
घट्टते। इति दुर्गादासः॥

घट्टः, पुं, (घट्टतेऽस्मिन् इति। घट्ट+"हलश्च।"
३।३।१२१। इति घञ्।) नद्यादौ स्नाना-
द्यर्थ प्रवेशस्थानम्। इति लिङ्गादिसंग्रहे अमर
भरतौ॥ घाट् इति यस्य प्रसिद्धिः। नगात इति
ख्यातो वा। तत्पर्य्यायः। तीर्थः २। अव-
तारः ३। इति हेमचन्द्रः। ४। १५३॥

घट्टगा, स्त्री, (घट्टेति नाम्ना गीयते उदाह्रियते
इति। घट्ट+गै+कः टाप् च।) नदीभेदः।
यथा,—

"मलापहा भीमरथी च घट्टगा
यथा च कृष्णा जलसाम्यतागुणैः।
मलापहा घट्टपयस्तथापि
पथ्यं लघु स्वादुतरं सुकान्तिदम्॥"
इति राजनिर्घण्टः॥

घट्टजीवी, [न्] पुं, (घट्टेन घट्टे देयतरपण्येन
शुल्कादिनेत्यर्थः जीवतीति। जीव+णिनिः।)
वर्णसङ्करजातिविशेषः। पाटुनि इति भाषा। स
तु वैश्यायां रजकाज्जातः। इति विवादार्णव-
सेतुः॥

घट्टना, स्त्री, (घट्ट+"ण्यासश्रन्थोयुच्।" ३।३।
१०७। इत्यस्य सूत्रस्य "घट्टिवन्दिविदिभ्यश्चेति
वाच्यम्।" इति वार्त्तिकोक्त्या युच् टाप् च।)
चलना। (आङ् पूर्ब्बकघट्टनाशब्दस्य प्रयोगो
यथा, माघे। १। १०।

"रणद्भिराघट्टनया नभस्वतः
पृथग्विभिन्नश्रुतिमण्डलैः स्वरैः॥")

हृतिः। इति हेमचन्द्रः॥